# Atrikritam Shiva Stotram

# અત્રિકૃતં શિવસ્તોત્રમ્

## Document Information

Text title : Atrikritam Shiva Stotram

File name : shivastotramatrikRRitaM.itx

Category : shiva, shivarahasya, stotra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 14 | 68-82||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# અત્રિકૃતં શિવસ્તોત્રમ્

અત્રિરુવાચ -
નમો નમો નિર્ગુણ નિર્વિકાર
નમો નમો નિષ્કલ નિષ્પ્રપઞ્ચ ।
નમો નમઃ શાન્ત નમો નમસ્તે
નમો નમસ્તે શિવ સર્વરૂપ ॥ ૬૮॥

નમો નમઃ સામ્બ નમો નમસ્તે
નમો નમઃ શઙ્કર સર્વહેતો ।
નમો નમોઽમેયગુણસ્વરૂપ
તુરીયશમ્ભો સતતં નમસ્તે ॥ ૬૯॥

નમો નમોઽનન્તગુણૈકસિન્ધો
પ્રપન્નબન્ધો ભગવન્નમસ્તે ।
નમો નમઃ શર્વ નમો નમસ્તે
નમો નમઃ પર્ણ્ય નમો નમસ્તે ॥ ૭૦॥

નમો નમસ્તેઽસ્તુ નમોઽસ્તુ શમ્ભો
નમો નમસ્તેઽસ્તુ નમોઽસ્તુ રુદ્ર ।
નમો નમસ્તે ગિરિજાસહાય
નમો નમસ્તેઽસ્તુ નમો મહેશ ॥ ૭૧॥

નમો નમસ્તેઽસ્તુ હિરણ્યબાહો
નમો નમસ્તેઽતુ હિરણ્યરૂપ ।
નમો નમસ્તેઽસ્તુ હિરણ્યવર્ણ
નમો નમસ્તેઽસ્તુ હિરણ્યહેતો ॥ ૭૨॥

નમો નમસ્તેઽસ્તુ શશાઙ્કમૌલે
નમો નમસ્તેઽસ્તુ પિનાકપાણે ।
નમો નમસ્તેઽસ્તુ વૃષાઙ્કકેતો

નમો નમસ્તેઽસ્તુ નમો ગિરીશ ॥ ૭૩॥

નમો નમસ્તે પૃથિવીસ્વરૂપ
નમો નમસ્તેઽતુ જલસ્વરૂપ ।
તેજઃસ્વરૂપાય નમો નમસ્તે
વાયુસ્વરૂપાય નમો નમસ્તે ॥ ૭૪॥

આકાશરૂપાય નમો નમસ્તે
કાલસ્વરૂપાય નમો નમસ્તે ।
નમો નમસ્તેઽસ્તુ દિગાત્મને સદા
નમો નમસ્તે સકલાત્મમૂર્તયે ॥ ૭૫॥

નમો નમસ્તેઽસ્તુ કર્પાદને સદા
નમો નમસ્તેઽસ્તુ કપાલમાલિને ।
નમો નમસ્તેઽસ્તુ નમસ્ત્વિષીમતે
નમો નમસ્તેઽસ્તુ નિષઙ્ગણે નમઃ ॥ ૭૬॥

નમો નમસ્તેઽસ્તુ નમોઽસ્તુ શાઙ્ગિણે
નમો નમસ્તેઽસ્તુ નમોઽસ્તુ બભ્રુષે ।
નમો નમસ્તે શિપિવિષ્ટ શમ્ભો
નમો નમસ્તેઽસ્તુ હરામરેશ ॥ ૭૭॥

નમો નમસ્તે હરિપૂજિતાઙ્ઘ્રે
નમો નમસ્તે હરિનેત્રપાદ ।
નમો નમસ્તે હરિજન્મહેતો
નમો નમસ્તે હરિગીતકીર્તે ॥ ૭૮॥

નમો નમસ્તે વિધિજન્મહેતો
નમો નમસ્તે વિધિમૂર્ધહર્તઃ ।
નમો નમસ્તે હરજન્મહેતો
નમો નમસ્તે હરહર્તૃમૂર્તે ॥ ૭૯॥

નમો નમસ્તેઽખિલજન્મહેતો
નમો નમસ્તેઽખિલનાશ હેતો ।
નમો નમો નિર્મલ નિત્યરૂપ
નમો નમો નિત્યવિચારશુદ્ધ ॥ ૮૦॥

નમો નમો નિત્યવિશુદ્ધ બુદ્ધ
નમો નમો નિર્ભય ભીમરૂપ ।
નમો નમઃ સર્ગવિસર્ગહેતો
નમો નમઃ સર્ગવિનાશહેતો ॥ ૮૧॥

નમો નમસ્તે હર મૃત્યુમૃત્યો
નમો નમસ્તે શિવવિષ્ણુમૃત્યો ।
નમો નમસ્તે જગદેકમૃત્યો
નમો નમઃ શઙ્કર શઙ્કરેશ ॥ ૮૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે અત્રિકૃતં શિવસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૪ । ૬૮-૮૨ ॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 14 . 68-82 ..

Encoded and proofread by Ruma Dewan

*Atrikritam Shiva Stotram*
pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*